National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 168-169
© 2026 NJHSR
www.sanskritarticle.com

**Arya.N.Unni**
Research Scholar,
National Sanskrit University,
Tirupati

**Correspondence:**
**Arya.N.Unni**
Research Scholar,
National Sanskrit University,
Tirupati

# "इतिहासकाव्यपरम्परायां शिक्षाशास्त्रेषु च सङ्गीतस्य भूमिका"

**Arya.N.Unni**

**शोधसारः**

अस्मिन् शोधलेखे भारतस्य प्राचीनइतिहासकाव्येषु तथा शिक्षासाहित्येषु सङ्गीतस्य स्थानं, विकासक्रमः, सामाजिक – धार्मिक – सांस्कृतिकसंबन्धश्च समालोक्य व्यवस्थितया निरूपितम्। रामायणकाले वाल्मीकिमहर्षिणा निर्मितं गेयकाव्यरूपं रामायणं सङ्गीत –साहित्ययोः समन्वितपरम्परां प्रकाशयति; लव–कुशयोः गान्धर्वविद्यायाम् अभिज्ञत्वेन जातिगान, स्वर, ताल, वीणातन्त्र्यादीनां प्रयोगः तस्मिन् काले सङ्गीतस्य उच्चस्तरविकासं सूचयति। महाभारतकाले वैदिक – सामपरम्परा, सामपाठ – सामगानचेष्टा, ऋष्याश्रमपरम्परा, तथा लौकिक – गान्धर्वसङ्गीतस्य प्रसारः समानरूपेण दृश्यते; सप्तस्वरव्यवस्था, ग्रामभेदाः, वाद्यप्रयोगश्च सामाजिकजीवने अविनाभावसम्बन्धं वहन्ति।

शिक्षाग्रन्थेषु - विशेषतः नारदीय - पाणिनीय शिक्षासु - स्वरनिर्माणप्रक्रिया, ग्राम – राग - तालव्यवस्था, श्रुति–तान– मुर्च्छनादीनां सैद्धान्तिकं विवेचनं प्रदत्तम्; एतेषां तत्त्वानां माध्यमेन प्राचीनभारतीयसङ्गीतस्य दार्शनिक, आध्यात्मिक तथा शास्त्रीयआधाररचना स्पष्टा भवति। एवं समग्रविमर्शेन सिद्धं भवति यत् वैदिककालात् आरभ्य महाकाव्यपरम्परायां यावत् सङ्गीतं केवलं कलारूपं न, अपितु धर्म, समाज, शिक्षा, एवं सांस्कृतिकचिन्तनस्य प्राणभूततत्त्वं आसीत्; तस्य परिपक्कतास्वरूपं नाट्यशास्त्रे सुस्पष्टं प्रतिफलति।

**मुख्यशब्दाः (Keywords) –** सङ्गीतशास्त्रम्, गान्धर्वविद्या, सामगानम्, शिक्षाग्रन्थाः, नाट्यशास्त्रम्

**लेखः**

इतिहासकाव्येषु सङ्गीतस्य स्थानं अत्यन्तं महत्त्वपूर्णम्। विशेषतः रामायणकाले तस्य प्रगतिर्विस्तारश्च स्पष्टतया दृश्यते। आदिकविवाल्मीकिना महर्षिणा रामायणस्य निर्माणं गेयकाव्यरूपेण कृतमिति परम्परया ज्ञायते। तस्मिन् काले सङ्गीतस्य कालात्मकः साहित्यात्मकश्च उभयः पक्षौ समं प्रफुल्लितौ स्तः, यत् अस्य विषये दृढं प्रमाणं रामायणे सर्वत्र उपलभ्यते। अनुष्टुप्छन्दो हि शब्दसङ्गीतस्य आद्यमूर्तिरिव दृश्यते। अश्वमेधयज्ञावसरे ऋष्यश्रृङ्गप्रमुखाः पुरोहिताः मन्त्रमाधुर्ययुक्तं, शिक्षाक्षरसमन्वितं, स्निग्धं गीतिरूपं स्तोत्रगानं च धारितवन्त-

**"ऋष्यश्रृङ्गादयो मन्त्रैः शिक्षाक्षरसमन्वितैः।**
**गीतिभिर्मधुरैः स्निग्धैर्मन्त्राह्वानैर्यथार्थतः॥"**[1]

इत्यस्य प्रमाणत्वात् ज्ञायते यत् सङ्गीतस्य प्रभावः न केवलं मानवसमाजे, अपि तु पशुषु अपि प्रत्यक्षः भवति।'गान्धर्व' इति शब्दः तस्मिन् काले अभिजातसङ्गीतविज्ञानस्य परिभाषकः आसीत्, येन गीतिवाद्ययोः समन्वितप्रयोगः सूचितः। बालकाण्डे लवकुशाभ्यां रामचरितस्य गान्धर्वरूपेण प्रस्तुतिर्निर्वहिता, महर्षिवाल्मीकिना तयोः स्वरमाधुर्यं प्रतिभां च दृष्ट्वा तौ स्वयमेव रामायणगानाय प्रशिक्षितौ। गान्धर्वविद्यायां पदस्य स्वरस्य च प्रमुखं स्थानं वर्तते; काव्यभावस्य अवगम्य मधुरगानरूपेण प्रस्तुतिर्लवकुशाभ्यां अतीव सुन्दरं फलितं अभूत्। बालकाण्डस्य चतुर्थसर्गे अष्टमे श्लोके तत्कालीन-सङ्गीतव्यवस्थायाः उन्नतिः स्पष्टा भवति-

**"पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम्।**
**जातिभिः सप्तभिर्युक्तं तन्त्रीलयसमन्वितम्॥"**[2]

अनेन ज्ञायते यत् लवकुशौ प्रमाणत्रयं - द्रुत, मध्य, विलम्बित - सप्तजातिभिः, तथा वीणातालेन सह काव्यगानं कृतवन्तौ। वैदिककाले यत्र जातिव्यवस्था नासीत्, तत्र रामायणकाले एव जातेः विकासः आरब्धः। एते जातिगानानि आधुनिकरागाणां पूर्वरूपमिव मन्यन्ते; तस्मात् एषः कालः भारतीयसङ्गीतस्य विशिष्टोन्नतिपर्यायः अभवत्। सप्तशुद्धजातीनां प्रयोगः तदा प्रचलितः आसीत्, यतः पश्चात् विकसिताः एकादश विकृतिजातयः भरतस्य नाट्यशास्त्रे विस्तारतः वर्णिताः।

एवं महाभारतकालेऽपि सामगान्धर्वपरम्परयोरुदारः प्रसारो दृश्यते। वैदिकसंस्कृतेः सिद्धिकाले स्वर-पद-स्तोभ-स्तोमादयः अङ्गाः शिक्षाग्रन्थेषु व्यवस्थितरूपेण प्रतिपादिताः। यज्ञेषु होतुः मन्त्रजपः, अध्वर्यवः हविप्रयोगः, सामगस्य स्तुतिगानं च महत्त्वपूर्णानि दायित्वानि आसन् –

**"ऋग्भिर्यमनुशंसन्ति नामकर्माणि बघृचाः ।**
**यजुर्भिर्य हविर्वेद्या जुह्युरध्वर्यवोऽध्वरे ॥**
**सामभिर्ये च गायन्ति सामगाः शुद्धबुद्धयः।"**[3]

यज्ञप्रसङ्गे प्रयुज्यमानात् सामगानात् अपि भिन्नरूपेण परम्परागतं **गाथा-गीतं** नाम गानप्रकारः प्रचलितः आसीत् इति ज्ञायते। अस्यां काले वैदिकसङ्गीतस्य समीक्षणा आरब्धा इति अपि सुस्पष्टं भवति। वैदिकैरार्यैः सामगानं केवलं यज्ञयागादिषु न, किन्तु दैनन्दिनजीवनस्य अनिवार्यभागरूपेण उपयुज्यत इति दरीदृश्यते। जन्म, मरण, अन्ये लौकिकविहाराः - एतेषु प्रसङ्गेषु अपि सामगीतप्रयोगः प्रचलितः आसीत्। विशेषतः अन्त्येष्टिसमये सामगानस्य प्रयोगः महाभारते उल्लिखितः अस्ति, यत् निम्नलिखितेन श्लोकेन साक्ष्यीकृतम्-

**"सामानि सामगास्तस्य गायन्ति यमसादने ।**
**हविर्धानं तु तस्याहुः परेषां वाहिनीसुखम् ॥"**[4]

ऋषीणां आश्रमेषु सामसंहितापाठः सामगीतगानं च निरन्तरं प्रचलितं आसीत्। महाभारतस्य शान्तिपर्वे संगीतस्य षड्जादि - सप्तस्वराराणां विषये प्रतिपादितमस्ति यथा –

**"षड्जर्षभः गान्धारो मध्यमः पंचमः स्मृतः ।**
**अतः परं तु विज्ञेयो निषादो धैवतस्तथा ॥**
**इष्टश्चानिष्टशब्दश्च संहतः प्रतिभानवान् ।**
**एवं बहुविधो ज्ञेयः शब्द आकाशसम्भवः॥"**[5]

अस्मिन् काले षड्ज-मध्यग्रामयोः अपेक्षया गान्धारग्रामस्य विशेषप्रयोगः प्रचलितोऽभूत्। नृत्ये नानाविधा हावभावाः गीत-वाद्यसमन्वयेन लोकोत्सवेषु आनन्दवृद्धये प्रयुज्यन्ते स्म। तारवाद्येषु वीणा अतीव प्रियमाध्यम् आसीत्, या वैदिकयज्ञेषु लोकपर्वेषु च समरूपेण उपयुज्यत। वेणु-मृदङ्ग-पनव-भेरी-शङ्खादीनि वाद्यानि अपि लोकप्रसिद्धानि आसन्।

## शिक्षाग्रन्थेषु सङ्गीतम्

वेदाङ्गेषु शिक्षायाः प्रमुखं स्थानं, यत्र वर्ण–स्वर–मात्रा–बल–साम–सन्तानाः विषयाः निरूपिताः। पाणिनीय –याज्ञवल्क्य–नारदीय–माण्डूकी–एते शिक्षाग्रन्थाः क्रमशः ऋक्–यजुः–साम–अथर्ववेदैः सम्बद्धाः सन्ति। नारदीयशिक्षायां विशेषतः सामवेदे प्रयुक्तस्वराणां, ग्राम–राग–तालादीनां च सैद्धान्तिकः निरूपणसमाहारः दृश्यते। शब्दोत्पत्तेः दार्शनिक-व्याख्यानम् पाणिनिना दत्तम्-

**"आत्मा बुद्ध्या समेत्यार्थान् मनोयुक्ते विवक्षया ।**
**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।।**
**मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ।।"**[6]

अस्य तात्पर्यम्—प्राणस्य गात्रेषु सञ्चरणेन मन्द्र-मध्य-तार-स्थानभेदेन नानास्वरनिर्माणः भवति।

नारदीये सप्तस्वराः, त्रिग्रामाः, एकविंशतिः मुर्छनाः, नवचत्वारिंशत् तानाः, एकविंशतिः विसर्गाश्च निर्दिष्टाः। ग्राम–राग–पद–तान–मुर्छनादीनां विभागा इतिहासदृष्ट्या विशेषमूल्यवन्तः। मुर्छनाः देव–पूर्वज–मुनि-संबद्धा इति त्रिविधाः स्मृताः।
स्वरवर्णनं यथाः —

**"पद्मपत्रप्रभः षड्ज ऋषभः शुकपिंजरः ।**
**कनकाभस्तु गान्धारो मध्यमः कुन्दसप्रभः॥**
**पञ्चमस्तु भवेत् कृष्णो धैवतं पीतवर्णकम् ।**
**निषादः सर्ववर्णश्च इत्येतत्स्वरवर्णता॥"**[7]

| स्वराः | वर्णानि |
|---|---|
| षड्जः | पत्रसदृशः |
| ऋषभः | शुकवत् |
| गान्धरः | सुवर्णः |
| मध्यमः | कुण्डवत् श्वेतः |
| पञ्चमः | कृष्णः |
| धैवतः | पीतवर्णः |
| निषादः | नानावर्णानां मिश्रणम् । |

षड्जं मध्यं पञ्चमश्च ब्राह्मणजातिः, ऋषभः धैवतश्च क्षत्रियः, गान्धरः निषादश्च अर्धवैश्यः अर्धशूद्रः। ग्रामरागस्य अन्तर्गताः षाडवः, पञ्चमः, मध्यग्रामः, षड्जग्रामः, साधारिता, कैशिकमध्यमः, कैशिकः इति सप्तप्रकाराः वर्णिताः सन्ति । स्वराणां उच्चारणसादृश्यं पशुध्वनिभिः सह दर्शितं सप्तस्वरस्य उत्पत्तिस्थानं च सूचितम् । षष्ठे खण्डे गात्रवीणाश्रुतिवृतिविस्तृतं वर्णनं भवति । श्रुतेः पञ्च प्रकाराः परिकीर्तिताः- **दीप्ता, आयता, करुणा, मृदु, मध्यमा** । सामस्व-रस्थानानि च तत्र विस्तरेण प्रतिपादितानि। नारदेन गानस्य दशगुणाः अपि निर्दिष्टाः - **रक्तपूर्णता, अलङ्कृति, प्रसन्नता, विकृति, सद्गुणता, समानता, मृदुता, मधुरता** इत्यादयः।

## उपसंहारः

एवम् प्रकारेण, प्राचीनभारतीय - इतिहासकाव्यानि सङ्गीतस्य अक्षयकोशाः सन्ति। रामायणस्य माधुर्यं, महाभारतस्य शास्त्रग-म्भीरता, शिक्षाग्रन्थानां वैज्ञानिकता च मिलित्वा भारतीयसङ्गीतस्य सुदृढं आधारस्तम्भं निर्मितवन्तः। एतानि तथ्यानि सिद्धयन्ति यत् अस्माकं सङ्गीतं केवलं कला न, अपितु दर्शनम् अस्ति।

## ग्रन्थसूची -


- Śārṅgadeva. Saṅgītaratnākaraḥ. Ed. by S. Subrahmanya Sastri & S. R. Krishna Sastri. Madras: The Adyar Library and Research Centre, 1940–1961.
- Nāradīya Śikṣā. Ed. & Tr. by N. G. S. Iyengar. Madras: Madras Government Oriental Series, 1950.
- Bharata. Nāṭyaśāstra.Ed. by Pandit Kedarnath Shastri. Varanasi: Chowkhamba Vidyabhawan, 1966


## पाद टिप्पणी

1. बाल १४, ३३
2. बालकाण्डं ४,८ श्लोकं
3. अनुशासनपर्वं २३,४९-५०
4. शान्तिपर्वं ८९,५२
5. शान्ति १८४-३९
6. पाणिनीय शिक्षा ३६/३७ श्लोकः
7. नारदीय शिक्षा १/४/१-२